# ॥ वाल्मीकि रामायण॥

## २ अयोध्याकाण्ड

### अध्याय १४

स तदन्तःपुरद्वारं समतीत्य जनाकुलम् ।
प्रविविक्तां ततः कक्ष्यामाससाद पुराणवित् ॥ १॥

प्रासकार्मुकबिभ्रद्भिर्युवभिर्मृष्टकुण्डलैः ।
अप्रमादिभिरेकाग्रैः स्वनुरक्तैरधिष्ठिताम् ॥ २॥

तत्र काषायिणो वृद्धान्वेत्रपाणीन्स्वलङ्कृतान् ।
ददर्श विष्ठितान्द्वारि स्त्र्यध्यक्षान्सुसमाहितान् ॥ ३॥

ते समीक्ष्य समायान्तं रामप्रियचिकीर्षवः ।
सहभार्याय रामाय क्षिप्रमेवाचचक्षिरे ॥ ४॥

प्रतिवेदितमाज्ञाय सूतमभ्यन्तरं पितुः ।
तत्रैवानाययामास राघवः प्रियकाम्यया ॥ ५॥

तं वैश्रवणसङ्काशमुपविष्टं स्वलङ्कृतम् ।
दादर्श सूतः पर्यङ्के सौवणे सोत्तरच्छदे ॥ ६॥

वराहरुधिराभेण शुचिना च सुगन्धिना ।
अनुलिप्तं परार्ध्येन चन्दनेन परन्तपम् ॥ ७॥

स्थितया पार्श्वतश्चापि वालव्यजनहस्तया ।
उपेतं सीतया भूयश्चित्रया शशिनं यथा ॥ ८॥

तं तपन्तमिवादित्यमुपपन्नं स्वतेजसा ।
ववन्दे वरदं बन्दी नियमज्ञो विनीतवत् ॥ ९॥

प्राञ्जलिस्तु सुखं पृष्ट्वा विहारशयनासने ।
राजपुत्रमुवाचेदं सुमन्त्रो राजसत्कृतः ॥ १०॥

कौसल्या सुप्रभा देव पिता त्वं द्रष्टुमिच्छति ।
महिष्या सह कैकेय्या गम्यतां तत्र माचिरम् ॥ ११॥

एवमुक्तस्तु संहृष्टो नरसिंहो महाद्युतिः ।
ततः संमानयामास सीतामिदमुवाच ह ॥ १२॥

देवि देवश्च देवी च समागम्य मदन्तरे ।
मन्त्रेयेते ध्रुवं किं चिदभिषेचनसंहितम् ॥ १३॥

लक्षयित्वा ह्यभिप्रायं प्रियकामा सुदक्षिणा ।
सञ्चोदयति राजानं मदर्थं मदिरेक्षणा ॥ १४॥

यादृशी परिषत्तत्र तादृशो दूत आगतः ।
ध्रुवमद्यैव मां राजा यौवराज्येऽभिषेक्ष्यति ॥ १५॥

हन्त शीघ्रमितो गत्वा द्रक्ष्यामि च महीपतिः ।
सह त्वं परिवारेण सुखमास्स्व रमस्य च ॥ १६॥

पतिसंमानिता सीता भर्तारमसितेक्षणा ।
आद्वारमनुवव्राज मङ्गलान्यभिदध्युषी ॥ १७॥

स सर्वानर्थिनो दृष्ट्वा समेत्य प्रतिनन्द्य च ।
ततः पावकसङ्काशमारुरोह रथोत्तमम् ॥ १८॥

मुष्णन्तमिव चक्षूंषि प्रभया हेमवर्चसं ।
करेणुशिशुकल्पैश्च युक्तं परमवाजिभिः ॥ १९॥

हरियुक्तं सहस्राक्षो रथमिन्द्र इवाशुगम् ।
प्रययौ तूर्णमास्थाय राघवो ज्वलितः श्रिया ॥ २०॥

स पर्जन्य इवाकाशे स्वनवानभिनादयन् ।
निकेतान्निर्ययौ श्रीमान्महाभ्रादिव चन्द्रमाः ॥ २१॥

छत्रचामरपाणिस्तु लक्ष्मणो राघवानुजः ।
जुगोप भ्रातरं भ्राता रथमास्थाय पृष्ठतः ॥ २२॥

ततो हलहलाशब्दस्तुमुलः समजायत ।
तस्य निष्क्रममाणस्य जनौघस्य समन्ततः ॥ २३॥

स राघवस्तत्र कथाप्रलापं
शुश्राव लोकस्य समागतस्य ।
आत्माधिकारा विविधाश्च वाचः
प्रहृष्टरूपस्य पुरे जनस्य ॥ २४॥

एष श्रियं गच्छति राघवोऽद्य
राजप्रसादाद्विपुलां गमिष्यन् ।

एते वयं सर्वसमृद्धकामा
येषामयं नो भविता प्रशास्ता ।
लाभो जनस्यास्य यदेष सर्वं
प्रपत्स्यते राष्ट्रमिदं चिराय ॥ २५ ॥

स घोषवद्भिश्च हयैः सनागैः
पुरःसरैः स्वस्तिकसूतमागधैः ।
महीयमानः प्रवरैश्च वादकैर्
अभिष्टुतो वैश्रवणो यथा ययौ ॥ २६ ॥

करेणुमातङ्गरथाश्वसङ्कुलं
महाजनौघैः परिपूर्णचत्वरम् ।
प्रभूतरत्नं बहुपण्यसञ्चयं
ददर्श रामो रुचिरं महापथम् ॥ २७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com